# राष्ट्रियसंस्कृतसंस्थानम्

शास्त्री – द्वितीयवर्षम् (वेदः) चतुर्थसत्रार्द्धस्य षष्ठपत्रम्

निरुक्तम् – 9-10 अध्यायौ

## लघूत्तरीयप्रश्नाः

1. नवमाध्याये कति पादाः सन्ति ?
   चत्वारः पादाः सन्ति।
2. दशमाध्याये कति पादाः सन्ति ?
   चत्वारः पादाः सन्ति।
3. नवमाध्याये किं व्याख्यातानि ?
   पृथिव्यायतनानि सत्त्वानि व्याख्यातनि।
4. पृथिव्यायतनेषु कः प्रथमगामी कः ?
   पृथिव्यायतनेषु अश्वः प्रथमागामी।
5. शकुनिशब्दस्य निरुक्तिं लिखत ?
   शक्नोति उन्नेतुमात्मानम्, शक्नोति नदितुम्, शक्नोति तकितुम्, सर्वतः शङ्करोऽस्तु इति वा। शक्नोतेर्वा।
6. गृत्समदः कस्मात् ?
   गृत्समदो गृत्समदनः, गृत्स इति मेधावि नाम, गृणातेः स्तुतिकर्मणः।
7. मण्डूकाः कस्मात् ?
   मज्जूका मज्जनात्, मदतेर्वा मोदतिकर्मणः, मन्दतेर्वा तृप्तिकर्मणः, मण्डयतेरिति वैयाकरणाः, मण्ड एषामोकः, मण्डो मदेर्वा मुदेर्वा।
8. अक्षाः कस्मात् ?
   अश्नुते एतानिति, अभ्यश्नुवते एतानिति वा।
9. युद्धोपकरणेषु प्रथमगामी कः ?
   रथः प्रथमगामी।
10. रथः कस्मात् ?
    रंहतेः गतिकर्मणः, स्थिरतेर्वा स्याद्विपरीतस्य, रममाणः अस्मिन् तिष्ठति, रपतेर्वा, रसतेर्वा।
11. दुन्दुभिरिति शब्दस्य निर्वचनं कथम् ?
    दुन्दुभिरिति शब्दानुकरणम्, द्रुमो भिन्न इति वा, दुन्दुभ्यतेर्वा स्यात् शब्दकर्मणः।
12. इषुधिः कस्मात् ?
    इषूनां निधानम्।
13. हस्तघ्नः इति कस्मात् ?
    हस्ते हन्यते इति।
14. धनुरिति शब्दस्य निर्वचनं लिखत ?
    धन्वतेः गतिकर्मणः, वधकर्मणो वा, धन्वति अस्मादिषवः इति।
15. ज्या इति कस्मात् ?
    जयतेर्वा, जिनातेर्वा, प्रजावयति इषून् इति वा।

16. इषुः इति कस्मात् ?
ईषतेर्गतिकर्मणः, वधकर्मणो वा।
17. अश्वाजनिशब्दस्य कोऽर्थः ?
कशा भवति । कशा = भयमश्वाय प्रकाशयति । कृष्यतेर्वाणूभावात् । वाक् पुनः प्रकाशयति अर्थान्, खशया, क्रोशतेर्वा।
18. उलूखलमिति कस्मात् ?
उरुकरं ऊर्ध्वखं, ऊर्क्करं वा।
19. वृषभः कस्मात् ?
प्रजां वर्षति इति वा, अति बृहति रेतः इति वा, वर्षणाद् वृषभः ।
20. द्रुघणः कस्मात् ?
द्रुममयो घनः ।
21. पितुरिति शब्दस्य कोऽर्थः ?
पितुरिति अन्ननाम। पातेर्वा, पिबतेर्वा प्यायतेर्वा।
22. गङ्गा इति कस्मात् ?
विशिष्टं स्थानं गच्छति गमयतीति वा गङ्गा। गङ्गा गमनात्।
23. यमुना इति कस्मात् ?
प्रयुवती गच्छति। प्रवियुतं गच्छतीति वा।
24. सरस्वती इति कस्मात् ?
सर इत्युदकनाम। सर्तेस्तद्वती।
25. शुतुद्री इति कस्मात् ?
शुद्राविणी क्षिप्रद्राविणी आशु तुन्नेव द्रवतीति वा।
26. परुष्णिरिति कस्मात् ?
इरावतीं परुष्णीत्युच्यते। पर्ववती भास्वती कुटिलगामिनी।
27. असिक्निया इति कस्मात् ?
असिता अशुक्ला इति।
28. मरुद्वृधा इति कस्मात् ?
मरुतः एना वर्धयन्तीति।
29. वितस्ता इति कस्मात् ?
अविदग्धा, विवृद्धा, महाकूला।
30. आर्जीकीया इति कस्मात् ?
ऋजीकप्रभवा ऋजुगामिनी वा।
31. आर्जीकीया इति नद्याः अपरं नाम किम् ?
आर्जीकीया विपाट् इत्याहुः।
32. विपाट् इति कस्मात् ?
विपाटनाद्वा, विप्राशनाद्वा, विप्रापणाद्वा।
33. सुषोमा इति कस्मात् ?
सुषोमा सिन्धुः। स्यन्दनात् सिन्धुः।

34. आपः कस्मात् ?
आप्नोतेः, सर्वमाभिः आप्यम् ।
35. ओषधयः कस्मात् ?
ओषत् धयन्तीति, ओषत्येना धयन्तीति, दोषं धयन्तीति वा ।
36. श्रद्धा इति कस्मात् ?
श्रद्धानात्, श्रत् सत्यं धीयते अस्यां सा श्रद्धा ।
37. शुनासीरौ कौ ?
वायुरादित्यौ ।
38. शुनासीर शब्दस्य का व्युत्पत्तिः ?
शुनो वायुः । शु एति अन्तरिक्षे । सीरः आदित्यः – सरणात् ।
39. दशमाध्याये किं वर्ण्यते ?
मध्यस्थाना देवता वर्ण्यन्ते ।
40. मध्यस्थानीयदेवतासु प्रथमगामी कः ?
वायुः प्रथमगामी ।
41. वायुरिति कथम् ?
वायुः वातेर्वा स्यात् गतिकर्मणः, एतेरिति स्थौलाष्ठीविः, अनर्थको वकारः ।
42. वरुणः कस्मात् ?
वरुणः वृणोतीति सतः ।
43. रुद्रः इति कस्मात् ?
रौतीति सतः, रोरूयमाणो द्रवति, रोदयतेर्वा ।
44. इन्द्रः इति कस्मात् ?
इरां वृणोतीति वा, इरां ददाति, इरां दधाति, इरां दारयत इति वा, इरां धारयन्त इति वा, इन्दवे द्रवति, इन्दौ रमते, इन्धे भूतानीति वा ।
45. पर्जन्यः इति कस्मात् ?
तृप्तेः आद्यन्तविपरीतस्य तर्पयिता जन्यः ।
46. बृहस्पतिः इति कस्मात् ?
बृहतः पाता वा पालयिता वा ।
47. क्षेत्रस्य पतिः इति कस्मात् ?
क्षेत्रस्य पतिः क्षेत्रं क्षियतेः निवासकर्मणः तस्य पाता पालयिता वा ।
48. वास्तोष्पतिः इति कस्मात् ?
वसतेः निवासकर्मणः, तस्य पाता पालयिता वा ।
49. वाचस्पतिः कस्मात् ?
वाचः पाता पालयिता वा ।
50. यमः कस्मात् ?
यच्छतीति यमः ।
51. मित्रः कस्मात् ?
प्रमीतेः त्रायते, सम्मिन्वानो द्रवतीति मेदयतेर्वा ।

52. कः इति कस्मात् ?
    कः कमनो वा क्रमणो वा सुखो वा। (कस्मै देवाय हविषा विधेम)
53. विश्वकर्मा इति कस्मात् ?
    विश्वकर्मा सर्वस्य कर्ता।
54. तार्क्ष्यः इति कस्मात् ?
    तीर्णे अन्तरिक्षे क्षियति। वायुरिति।
55. मन्युः इति कस्मात् ?
    मन्यतेः दीप्तिकर्मणः। क्रोधकर्मणो वधकर्मणो वा, मन्यन्ति अस्मादिषवः।
56. सविता इति कस्मात् ?
    सविता सर्वस्य प्रसविता।
57. वातः इति कस्मात् ?
    वातीति सतः।
58. वेनः कस्मात् ?
    वेनतेः कान्तिकर्मणः। वायुरित्यर्थः।
59. असुनीतिः इति कस्मात् ?
    असून्नयतीति। मध्यमः प्राणः।
60. इन्दुः इति कस्मात् ?
    इन्धेः उनत्तेर्वा। चन्द्रमा इति।
61. प्रजापतिः इति कस्मात् ?
    प्रजानां पाता पालयिता वा।
62. पुरूरवा इति कस्मात् ?
    बहुधा रोरुप्यते। मध्यमस्थानीयः वायुः।
63. श्रोत्ररूपेण प्रतिष्ठितं वेदाङ्गं किम् ?
    निरुक्तम्
64. दुर्गावृत्तिकारेण दुर्गाचार्येण कति निरुक्तकाराः उल्लिखिताः सन्ति ?
    14 (चतुर्दश)
65. यास्कमते वैदिकपदं कति विधं भवति ?
    चतुर्विधम्
66. निघण्टौ कति अध्यायाः सन्ति ?
    पञ्च अध्यायाः सन्ति।
67. निरुक्तं कति विधम् ?
    पञ्चविधम्
68. निरुक्तस्य उपजीव्यग्रन्थविशेषः कः ?
    निघण्टुः
69. निरुक्ते कः विधिः प्रयुज्यते ?
    निर्वचनम्

70. कति भावविकाराः विद्यन्ते ?
    षड्भावविकाराः (06)
71. यास्कमतानुसारं स्थानभेदेन कति विधाःदेवताः ?
    त्रिविधाः
72. उपलभ्यमाननिरुक्तग्रन्थस्य प्रणेता कः?
    यास्कः
73. पृथ्वीस्थानीया देवता का अस्ति ?
    अग्निः
74. सुपर्णा इति कस्मात् ?
    सुपर्णाः सुपतनाः। सुपर्णा सुपतनानि ।
75. परुच्छेपः इति शब्दस्य कोऽर्थः ?
    परुषि परुषि शेपोऽस्येति वा ,परुच्छेपः ऋषिः नाम।
76. पञ्चमनुष्यजातानि (पञ्चजनाः) के सन्ति ?
    ब्राह्मणक्षत्रियवैश्यशूद्रनिषादश्च सन्ति ।
77. "इरां दारयते" इति वाक्ये इरां शब्दस्य कोऽर्थः ?
    मेघः
78. "मरुद्वृधा " इति शब्दस्य कोऽर्थः ?
    सर्वा नद्यः,मरुत एना वर्धयन्ति ।
79. "शुतुद्री" इति कस्मात् ?
    शुतुद्री शुद्राविणी क्षिप्रद्राविणी ।आशु तुन्नेव द्रवतीति वा।
80. "त्रितः" इति शब्दस्य कोऽर्थः ?
    त्रिस्थानः इन्द्रः
81. "मृगः" इति कस्मात् ?
    मृगमयः,मृगयतेर्वा ।
82. ग्रावाणः इति कस्मात् ?
    ग्रावाणो हन्तेर्वा गृणातेर्वा गृह्णातेर्वा ।
83. निरुक्ते कति अध्यायाः सन्ति ?
    14 अध्यायाः सन्ति ।

**रिक्तस्थानं पूरयत**

84. सुखमिति.....................। **(कल्याणनाम)**
85. सुमङ्गलश्च शकुने.........................।**(भव कल्याणमङ्गलः)**
86. मा च त्वा .................सर्वतो विदत् । **(काचिदभितिः)**
87. भद्रं वद दक्षिणतो भद्रमुत्तरतो वद।............भद्रं पश्चात्कपिञ्चलः ॥ **(भद्रं पुरस्तान्नो वद )**
88. संवत्सरंशिश्याना.............व्रतचारिणोऽब्रवाणाः। **(ब्राह्मणा)**
89. अक्षा अश्रुवत एनानिति............एभिरितिवा । **(वाभ्यश्रुवत)**
90. आपो हिष्ठा मयो.................चक्षसे । **(भुवस्ता न ऊर्जे दधातन। महे रणाय)**

91. अरण्यानी ..........................पत्नी। **(अरण्यस्य)**
92. श्रत् सत्यं ..................वा श्रद्धा। **(धीयतेऽस्यां)**
93. अग्नायी .......................पत्नी। **(अग्नेः)**
94. अथातो ................................द्वन्द्वानि।**(अष्टौ)**
95. नीचीनद्वारं..........................कबन्धं मेघम्। **(वरुण)**
96. यदरुदत्तद्रूद्रस्य..........................इति काठकम्।**(रुद्रत्वम्)**
97. ब्रह्मणस्पतिर्ब्रह्मणः.....................पालयिता वा। **(पाता वा)**
98. रूपं रूपं .........................बोभवीति। **(मघवा)**
99. योऽहिः स बुध्नो .....................तन्निवासात्। **(बुध्नमन्तरिक्षं)**
100. निरुक्ते....................काण्डानि सन्ति। **(त्रीणि)**

**डा. प्रदीप कुमार दीक्षित**
प्राध्यापकः वेदविभागः
राष्ट्रियसंस्कृतसंस्थानम्
गोमतीनगरम्, लखनऊ
मो. 8707565151
ईमेल – pradeepdixitbhu@gmail.com